**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 1
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# भारतीयपरम्परायां गुरोः विराट् स्वरूम्

**डा. इक्कुर्ति वेङ्कटेश्वर्लु**

**सहायकाचार्यः, शिक्षाविभागः, श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली**

**Article Info**

**Publication Issue :**
January-February-2024
Volume 7, Issue 1

**Page Number :** 170-174

**Article History**
Received : 05 Jan 2024
Published : 17 Jan 2024

**शोधसारांशः-** भारतीयज्ञानपरम्परायां गुरोः अनिवार्यता आवश्यकता च नितरामासीत्। यदि छात्रः सच्छीलः चारित्रकवान्, गुणवान्, आचारवान्, विज्ञानवान्, उत्तमव्यक्तित्ववान् च भवितुमिच्छति। तर्हि गुरोः सान्निध्ये एव तेन स्थातव्यम्। गुरुं विना छात्रः ज्ञानं प्राप्तुं न प्रभवति।पुस्तकात् अधीता विद्या गुरुसन्निधौ अधीतविद्यायाः समाना न भवति यथा जारगर्भ इव स्त्रियः न प्रकाशते सभायाम्। 272 तथैव गुरुं विना अधीतविद्या समाजे वा जीवनार्थं न उपयुज्यते स्म। अर्थात् गुरुणा विना छात्राधिगमः तावान् प्रभावं न जनयति स्म। भारतीयज्ञानपरम्परायां गुरोः स्थानमत्यन्तप्रभावि आसीत्। गुरुं विना ज्ञानं प्राप्तुं न शक्यते। आचार्यः स्वशिष्यम् उपनयनसंस्कारः समाचर्य गर्भे धरति स्म। 273 एतेन ज्ञायते गुरुः न केवलं शैक्षिकाधिगमाय, अपि च आध्यात्मिक-आधिदैविक-आधिभौतिकाभिवृद्ध्यर्थं परिश्रममकरोत्। एवं स छात्राय सर्वविधविद्यायाः प्रदाताऽसीत्। आश्रमे गुरुसन्निधौ एव सुव्यवहारं शिक्षते। एवमुपनयनादारभ्य गृहस्थाश्रम स्वीकारपर्यन्तं सर्वदा शिष्यः गुरौ अधीनः भवति । गुरुश्च शिष्यस्य योगक्षेमादिकं सर्वं पश्यति ।

**मुख्यशब्दाः-** छात्रः, स्त्रियः भारतीयज्ञानपरम्पारा, गुरोः, सच्छीलः चारित्रकवान्, गुणवान्, आचारवान्, विज्ञानवान्, उत्तमव्यक्तित्ववान् ।

शिक्षा शिष्याचार्यविषयरूपा त्रिध्रुवी प्रक्रिया इत्याधुनिकानां मतम्। शिक्षा सर्वदा च चतुर्ध्रुवात्मकप्रक्रिया एवेति भारतीयप्राचीनानां मतमासीत्। भारतीयपरम्परायाम् अतीवप्रधानानि चत्वारि तत्त्वानि सन्ति। तान्येव चतुर्ध्रुवात्मकप्रक्रियात्वेन स्वीक्रियते। तानि - आचार्यः,शिष्यः, विषयः, विधिश्चेति। इमानि चत्वारि तत्त्वानि प्रधानतत्त्वानि परस्परं सुसमन्वितानि व्यवस्थितानि च सन्ति अधिगमप्रक्रियां प्रवर्तयन्ति। अत्र शिक्षकेण विना अधिगमप्रणाली कुण्ठिता भवति। प्राचीनाधिगमप्रणाल्यां तु शिक्षकं गुरुः, देशिकः, आचार्य, उपदेष्टा, उपाध्यायः, अध्यापकः इत्यादयो बहवो शब्दाः आचार्यार्थकाः वर्तन्ते । तत्तत् व्यवहारे उपाधिरेव कारणम् ।

1 .**गीर्पति गिषणो गुरुः** - अमरकोशः, 1-3-24

2 .**उपाध्यायोऽध्यापकः अथ स निषेकाधिकृत् गुरुः** -अमरकोशः, 2-7-7

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License** (CC BY-NC 4.0)

**3.गुरु: गीष्पति पित्रादौ** – अमरकोशः, 3-3-162
आचार्यशब्दोऽपि गुरुपर्याय: कोशेषु दृश्यते ।
4.मन्त्रव्याख्याकृत् आचार्य: इत्यपि अमरकोश: ।

शास्त्रेषु पुराणेष्वपि गुरुशब्द: बहुष्वर्थेषु दृष्ट: । एते सर्वेऽपि शब्दा: अध्ययनाध्यापनसम्बन्धबोधका: इति तत्तत् शब्दानां व्युत्पत्ति: विशेषार्थश्च उदाह्रियते।

**गुरुशब्दार्थ:-** शब्दकल्पद्रुमे गुरुशब्दस्य निरुक्ति: प्रकृतिप्रत्ययविभागेन निरूपणं तत्तदर्थेषु प्रयोगविशेषाश्च विस्तरेण दर्शिता: । यादृशो गुरु: वर्जनीय: सोऽपि प्रकार: दर्शित: । गुरुणा इति उपदिशति वेदादि शास्त्राणि इन्द्रादि देवेभ्य: इति गुरु: ।

यद्वा गीर्यते, स्तूयते गुरु निगरणे तुदादिपरस्मैपदि सेट् इति धातोर्वा, गृणाति धर्मादि गृ क्रियादि परस्मैपदि सेट् इति धातोर्वा गिरति अज्ञानम् – इत्यादिषु अर्थेषु धातुद्वयस्यापि कुग्रोरुच्चा इति उत्प्रत्य: । रुकारस्य उकारादेशे उरण् रपर: इति रपरत्वे गुरु: इति रूपम् ।

**निषेकादीनि कर्माणि य: करोति यथाविधि: ।**

**सम्भावयति च अन्येन स विप्रो गुरुरुच्यते ॥** मनुस्मृतिः, अ–2, श्लो–142, पृ–72

श्रोत्रियस्य चत्वारिंशत् संस्कारा: वेदविहिता: । संस्कारेणैव द्विजो भवति । तदुक्तं मनुना –

**जन्मना ब्राह्मणो ज्ञेय: संस्कारै: द्विज उच्यते ।**

**विद्यया याति विप्रत्वं त्रिभि: श्रोत्रिय उच्यते ॥** मनुस्मृतिः, पृ–

अत: गर्भाधानादारभ्य संस्कारा: श्रोत्रियाय विहिता: । प्रायश: गर्भाधानदारभ्य उपनयनात् प्राक् अष्टौ संस्कारा: शिशो: पिता एव कारयति । अष्टौ संस्कारा: –

**गर्भाधानपुंसवनसीमान्तोन्नयनजातकर्मनामकरणान्नप्राशनचौलोपनयनम्**–गौतम, प्रथमप्रश्न:, अ–8, सू–14, पृ–101

एते संस्कारा: पितृ अभावे अन्यो गुरु: करोति । उपाध्याय:, पिता, ज्येष्ठभ्राता, राजा, मातुल:, स्वशुर:, मातामह:, पितामह:, पितृव्य इत्येते पुमांस: गुरव: । मातामहि, मातुलानी, माता, भगिन्य:, श्वश्रू:, पितामहि ज्येष्ठाधात्री इत्येता: स्त्रीवर्गे गुरव: ।

पुराणनिर्दिष्टानुसारेण गुरो: लक्षणानि । एवं विधानि शब्दकल्पद्रुमे उदाहृतानि।

**सदाचार: कुशलघो: सर्वशास्त्रार्थपारग: ।**

**नित्यनैमित्तिकानाञ्च कार्याणां कारक: शुचि: ॥**

**असर्व्वमैथुनपर: पितृदेवार्चने रत: ।**

**गुरुभक्तो जितक्रोधो विप्राणां हितकृत् सदा ॥**

**विद्यावान् शीलसम्पन्न: सत्कुलीनो महामति: ।**

**परदारेषु वैदिकगुणै: युक्त: कार्यो गुरु: नृपै: ॥** शब्दकल्पद्रुम:, पृ–340

अपि च मन्त्रगुरो: लक्षणं शब्दकल्पद्रुमे एवमुदाहृत: । गकार: सिद्धिद: प्रोक्त:। रेफ: पापस्य कारक: । उकारो विष्णु:, अव्यक्त: त्रितयात्मा गुरु: पर: । एवं ज्ञानोपदेशेन अज्ञानं हन्तीति तौदादिकात् धातो: अर्थ: लभ्यते । एवं अर्थद्वयनिरूपक: कश्चन श्लोक: लोके प्रसिद्ध: ।

**गुशब्दस्त्वन्धकारस्यात् रुशब्दस्तन्निवारक: ।**

**अन्धकारनिवर्तित्वात् गुरुरित्यभिधीयते ।।** बृह, उ-87, पृ - 240

**उपाध्याय**:- **उपेत्य अस्मात् अधीते** इति विग्रह उप अधि इति उपसर्गद्वयपूर्वकात् इङ् अध्ययने एषधातुः नित्यं अधि उपसर्गपूर्वको भवति । तस्मात् इङ्श्च इति सूत्रेण इङ् अध्ययने इति धातोः घञ् प्रत्यये उपाध्यायः इति रूपम् । स च जीविकाहेतोः अध्यापयतीति उपाध्यायार्थं मनुः प्राह ।

**एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुनः ।**

**योऽध्यापयति वृत्त्यर्थमुपाध्यायस्स उच्यते ।।** मनुस्मृति, अ-2, श्लो-142, पृ-72

**अध्यापक**:- अध्यापयति = पाठयति अत्यध्यापकः । इङ् धातोः हेतु मति च इति णिच् प्रत्यये णिजन्तस्य सनाद्यन्तधातुत्वात् ण्वुल् तृचौ इति ण्वुल् प्रत्ययः । युवोरनाकौ इत्येकादेशे अचोऽञ्णिति इत्युपधावृद्धौ अर्तिहीत्वीरीन्क्नूयीक्ष्माय्यातां पुङ्णौ इति पुगागमे अध्यापकः इति रूपम् । अध्यापक - उपाध्याय शब्दौ तुल्यार्थकौ भवतः ।

**देशकः - देशिक**:- देशति धर्मम् इति देशकः । दिश अतिसर्जने इति धातोः औणादिकं रूपं देशिकः इति ण्वुल् प्रत्यये देशकः इति, एवं दिशति, उपदिशति शास्त्रादीन् इति देशिकः। एवं देशिकशब्दोऽपि गुरुपर्यायः श्रूयते ।

**आचार्य**:- आचार्यते अस्योपदेशेन इति आचार्यः । चर् गतौ उपधा वृद्धौ आचार्यः इति रूपम् । आचार्य शब्दार्थः उपनीयतु यः शिष्यं इत्यत्र दर्शितः ।

एवं गुरुशब्दस्य अर्थविचारणे आचार्यः, गुरुः, उपाध्यायः, अध्यापकेति सर्वे गुरुपर्यायाः, किन्तु तेषां प्रवृत्तौ भेदेन जीविकार्थं वृत्तिमाश्रितः । उपाध्यायः, अध्यापकः वा गुरोः तुला नार्हति । यतः गुरुः फलनिरपेक्षं विद्या वितरति । गुरोरपि आचार्यः श्रेष्ठः । यतः सः शिष्यं संस्कारवन्तमपि करोति । तदुक्तं गौतमेन -

**आचार्यः श्रेष्ठो गुरूणां मातेत्येके एके इति पदेन मनोः मतं सूचितम्** । गौतम.प्र.प्र,अ-2, सू-56, पृ-29

**उपाध्यायाद्दशाऽऽचार्यः आचार्याणां शतं पिता ।**

**पितुर्दशगुणं माता गौरवेणातिरिच्यते ।।** गौतम, प्र.प्र, अ-2, पृ-29

त्रैवर्णिकानां कर्तव्येषु षट् कर्माणि धर्मशास्त्रकारैः निरूपितानि ।

1.इज्जा - स्वयं यज्ञादि करणम् ।

2.अध्ययनम् - वेदशास्त्राणाम् ।

3.दानम् - प्रसिद्धम् एतानि त्रीणि सार्ववर्णिकानि ।

4.याजनम् - धनं गृहीत्वा यज्ञादि निर्वहणम् ।

5.अध्ययनम् - जीवितार्थं धनं गृहीत्वा यज्ञोपदेशककरणम् ।

6.प्रतिग्रहः - एतेषु षट्कर्मसु प्रथमत्रयाणामेव सर्वेषामधिकारः, ब्राह्मणस्य इतराणि त्रीण्यपि अधिकानि ।

**द्विजातीनामध्ययनमिज्जादानम् ।**

**ब्राह्मणस्याधिकाः प्रवचनयाजनप्रतिग्रहाः ।।** गौतम,द्वि.प्र, अ-1, सू-1,2, पृ-93

अतः अध्यापनं ब्राह्मणस्यैव विहितमासीत् ।

**गुरोः अदोषता**- गुरोः अदोषता प्रायशः गुरुः पक्षपातरहितः एव शिष्यां विद्यामध्यापयति । किन्तु कश्चन कुशाग्रबुद्धि शिष्यः गुरोः अधीतम् , धारयितुं, प्रतिवक्तुञ्च प्रभवति । कश्चन असमर्थः यथा शक्तिः गृह्णाति न तत्र गुरोः दोषः, पक्षपातो वा कारणमिति वेदेषु स्पष्टमुक्तम् -

**अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः ।**

**आदघ्नास उपकक्षास उत्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे ।।** निरुक्तम्, पूर्व, नैघष्टु, अ–1, पा–3, स–4, पृ–63

दुर्गादासः शिष्यौ सधर्माणौ अपि तेषां मेधाशक्तौ भेदो भवतीति मन्त्रमिमं व्याख्यातवान् ।

अस्य मन्त्रार्थः भगवता यास्केन एवं निरूपितः अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेरनुक्तेरित्याग्रायणस्तस्मादेते व्यक्ततरे इव भवति इति ह विज्ञायते कर्णः कृन्ततेर्निकृत्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभृवुरास्यदन्धा अपर उपकक्षदघ्ना अपरे आस्यमस्तेरास्यन्दत एतदन्नमिति वा दघ्नं दध्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति ह्रदा इवैके प्रस्नेया ह्रदा इवैके प्रस्नेददृशिरे स्नानार्हा ह्रदो ह्रदतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽथापि समुच्चयार्थे भवति । निरुक्तम्, नैघण्टु, अ–1, पा–3, ख–4, पृ–64

आचार्यदुर्गादासोऽपि एष मन्त्रः एवमेव आख्यातः । गुरुणा वेदाध्यापनेन सार्थं वेदार्थोऽपि शिष्यबुद्धिविषयः कार्यः । अन्यथा सर्वमपि अध्ययनं व्यर्थं स्यत् । ज्ञानं सर्वम् अर्थज्ञस्य स्पष्टतमं भासते इति ऋग्वेदे स्पष्टम् ।

महाकवीनां काव्येष्वपि ग्रहणे धारणे च शिष्यमतिरेव कारणमिति स्पष्टं निरूपितम् ।

**वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे ।**
**न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।।**
**भवति हि पुनर्भूयान् भेदः फलं प्रति तद्यथा**
**प्रभवति शुचिर्बिम्बग्राहे मणिनं मृदादयः ।।** उत्तररामचरितम्, अङ्कः–2, श्लो–4,

**उत्तमस्य गुरोः लक्षणम् -** उत्तमः आचार्यः कथं भवेदिति चर्चाऽपि प्राचीनकाले बहुधा आसीत् । कालिदासः उत्तमाध्यापकस्य लक्षणं श्लोकद्वये सम्यक् निरूपितवान् । कश्चनाचार्यः लब्धप्रतिष्ठः । नूतनविषयग्रहणे विमुखः भवति । अपि च संवादेन विद्या वृद्धिः भवतीति ज्ञात्वाऽपि विवाद भीरुः ततो दूरी भवति । परकृतां निन्तामपि सहते । तस्य शास्त्रं केवलं जीविकायै भवति सः ज्ञानपण्यः वणिक् ।

एकस्याचार्यस्य प्रवचन शैली, अध्यापन रीतिश्च समर्था भवति । सः शास्त्रं दृढं न जानाति । कस्यचन आचार्यस्य सर्वाणि शास्त्राणि जिह्वाग्रे भवन्ति । सः पाठयितुं न समर्थः । यस्याध्यापकस्य संक्रान्ति सुष्ठुतरा शास्त्रपाण्डित्यं समीचीनं भवति सैव अध्यापकाग्रगण्यः । तच्च श्लोकद्वयं उपर्युक्त भावात्मकं मालविकाग्निमित्रनाटके वर्तते ।

**लब्धस्पदौऽस्मीति विवाद भीरोऽस्मीति वीक्षमाणस्य परेण निन्दाम् ।**
**यस्यागमः केवलजीविकैव तं ज्ञानपण्यं वणिजं वदन्ति ।।**
**श्लिष्टा क्रिया कस्यचिदात्मसंस्था संक्रान्तिरन्यस्य विशेषयुक्ता ।**
**यस्योभयं साधु स शिक्षकाणां धुरि प्रतिष्ठापयितव्य एव ।।** मालविका.., अङ्कः–1, श्लो–17,18, पृ –22

**आचार्यः सच्चरित्रबोधकः:-** बालम् एवं शिष्यं पितरौ गुरोः हस्ते अर्पयतः । गुरुकुलवास क्लेशसहनेन व्रताचरणेन च सः विनयवान् एव भवति । किन्तु गुरुकुलं बहिः आगतः । लोकेऽपि सः सद्वर्तनं भवदिति आशयेन गुरुः तद्विषयकं हितमुपदिशतीति । उपनिषत्सु बहुधा वर्णितम् । यथा तैत्तिरियोपनिषदि गुरुणा कृतः हितोपदेशः – **वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सी । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् ।**

**देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव ।**
**पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव ।**
**यान्यनवद्यानि कर्माणि तानि सेवितव्यानि ॥**

**नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि । नो इतराणि । ये के चास्माच्छ्रेयासो ब्राह्मणाः तेषां त्वयाऽऽसनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । श्रिया देयम् । ह्रिया देयम् । भिया देयम् । संविदा देयम् । अथ यदि ते कर्मविचिकित्सा वा वृत्तिविचिकित्सा वा स्यात्** । 3

**ये तत्र ब्राह्मणाः संमर्शिनः । युक्ता अयुक्ताः । अलूक्षा धर्मकामाः स्यः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । एवञ्चैतदुपास्यम् ।** तैत्तिरी, अनुवाक्-11, शिक्षावल्ली 1त:4, पृ-112

स्वाध्यायप्रवचनाभ्यां सर्वं व्याप्तं भवतीति अस्याम् उपनिषदि स्पष्टम् । शिष्यः विद्याभ्यासात् विरतोऽपि गुरुकुलात् निर्गतोऽपि न्याय्यात् पथः न प्रचलेत् इति गुरोः शिष्यः आदरबुद्धिः अस्याम् उपनिषदि दर्शिता । सत्यवादित्वेन धर्माचरणेन सर्वदा रक्षितो भवति । एवं मातृदेवो भव, पितृदेवो भव इत्यादेशेन सामाजिकी स्थितिरपि तस्य न विहन्यते ।

## सन्दर्भग्रन्थसूची


1. आपस्तम्बगृह्यसूत्रम् - लक्ष्मीनरसिंहाचार्यः, गायत्री प्रकाशनम्, हैदराबाद्.
2. आपस्तम्बधर्मसूत्रम् - श्री हरिदत्तमिश्रः, चौखम्भा संस्कृत संस्थान, वारणासि,1999.
3. आपस्तम्बीयं श्रौतसूत्रम् - श्रीनिवासगोपालाचार्य, O.R.I.,Mysore, 1953.
4. ईशादि नौ उपनिषद् - गीताप्रेस्, गोरखपूर्.
5. प्राचीनभारत की शिक्षा पद्धति - डा.कृष्णकुमार, मयंक प्रकाशन, हरिद्वार, 1999.
6. वेदों मे समाजशास्त्र अर्थशास्त्र और शिक्षाशास्त्र - डा.कपिलदेव द्विवेदी, विश्वभारती अनुसन्धान परिषद, ज्ञानपुर.
7. वैदिकशिक्षापद्धतिः - डा.भाष्यकरमिश्रः, महर्षिसान्दीपनि राष्ट्रियवेदविद्याप्रतिष्ठानम्,उज्जयिनि, 2003.
8. Ancient learning system - Prof. V. Muralidhara Sharma, Professor of Education, R.s.v.p., Tirupati.